# bhAratabhUmAtRistotra

# ભારતભૂમાતૃસ્તોત્રમ્

## Document Information

Text title : bhAratabhUmATRistotram

File name : bhAratabhUmATRistotram.itx

Category : misc, stotra

Location : doc_z_misc_general

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, Lakshmi R.S. lakish at gmail.com

Latest update : August 29, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ભારતભૂમાતૃસ્તોત્રમ્

વન્દે માતરમવ્યક્તાં વ્યક્તાં ચ જનનીં પરામ્ ।
દીનોઽહં બાલકઃ કાંક્ષે સેવાં જન્મનિ જન્મનિ ॥ ૧॥
સાગરાલિઙ્ગિતાં લક્ષ્મીં જગજ્જનકકન્યકામ્ ।
સ્થિતાં હિમનગસ્યાંકે પાર્વતીમપરાં ભજે ॥ ૨॥
શુભ્રં ધર્મધ્વજં માતુઃ કિં વા રાશીકૃતં યશઃ ।
રૌપ્યં વા મુકુટં દિવ્યં વન્દેઽહં તં હિમાલયમ્ ॥ ૩॥
જાહ્નવીયમુનાસિંધુબ્રહ્મપુત્રશતદ્રુભિઃ ।
ભૂદેવીં પઞ્ચધારાભિઃ સતતં સાઽભિષિઞ્ચતિ ॥ ૪॥

નગાધિપં ધારયંતીં મસ્તકે રત્નમદ્ભયમ્ ।
કાશ્મીરં ચ લલાટે ભ્રૂમધ્યે નેપાલિકાં શુભામ્ ॥ ૫॥

નર્મદાતાપતીવિંધ્યસપ્તપીઠકમેખલામ્ ।
પૂર્વાપરાચલોરૂં ચ મલયં પાદપીઠકે ।
મધ્યદેશોદરે ગુપ્તાનક્ષયાન્ ધનસઞ્ચયાન્ ॥ ૬॥

અસુરાણાં પુરી લંકા દાસી યચ્ચરણયોઃ કૃતા ।
તાં દેવીં ભારતીં વન્દે માતરંવિશ્વપૂજિતામ્ ॥ ૭॥

દ્રુષ્ટા ચૈવોપનિષદાં ગીતશાસ્ત્રપ્રવર્તકઃ ।
ષડ્દર્શનપ્રવક્તા ચ ભગવાન્પાણિનિર્મુનિઃ ॥ ૮॥

વાલ્મીકિશ્ચ તથા વ્યાસઃ કાલિદાસો મહાકવિઃ ।
આર્યભટ્ટશ્ચ ભરતઃ શંકરોઽદ્વૈતકેસરી ॥ ૯॥

ભીષ્મરામાર્જુના વીરા નૃપૌ રામયુધિષ્ઠિરૌ ।
સાવિત્રી દ્રૌપદી સીતા દમયંતી ચ તારકા ॥ ૧૦॥

મહાધાન્યદ્વિતીયાનિ રત્નાન્યેતાનિ ભૂતલે ।
જનની ભારતી તેષાં રત્નગર્ભા કથં ન સા ॥ ૧૧॥

વસુન્ધરા રત્નગર્ભા રસા વિશ્વંભરા ક્ષમા ।
સર્વંસહા સ્થિરા ચૈવ ભારતી ભૂસુકન્યકા ॥ ૧૨॥
રત્નાકરઃ સ્વયં ભક્ત્યા મુક્તોપાયનપૂર્વકમ્ ।
ચરણાન્ક્ષાલયત્યસ્યા અતંદ્રશ્ચ દિવાનિશમ્ ॥ ૧૩॥
કૈલાસદ્વારકાધીશૌ રામેશ્વરપુરીશ્વરૌ ।
દ્વારપાલા બભૂવુશ્ચ સૌભાગ્યં માતુરદ્ભુતમ્ ॥ ૧૪॥

પોષ્યન્તિ સદા માતુઃ પર્વતસ્તનમંડલાત્ ।
નિઃસૃતાશ્ચ પયોધારાઃ સંતતીનાં પરંપરાઃ ॥ ૧૫॥
પુત્રવત્સલતા  માતુરગાધા હરિણા સ્વયમ્ ।
અવતીર્યોદરે સોઢં ગર્ભદુઃખં પુનઃ પુનઃ ॥ ૧૬॥
મરણે જન્મકાલે ચ મુમૂર્ષુર્નવબાલકઃ ।
ત્વદંકે ચૈવ સંશેતે અહો વત્સલતા તવ ॥ ૧૭॥

પદ્માલયા ત્વમેવાસિ ત્વમેવ ચ સરસ્વતી ।
અન્નપૂર્ણા ત્વમેવાસિ ત્વમેવ ચ શિવા સતી ॥ ૧૮॥
ત્વદૃક્ષાઃ કલ્પવૃક્ષાશ્ચ ચિન્તામણિશિલાઃ શિલાઃ ।
ત્વદ્વનં નંદનં સાક્ષાત્સાક્ષાત્ત્વં સ્વર્ગદેવતા ॥ ૧૯॥

પ્રતિજન્મનિ મે ચિત્તં વિત્તં દેહશ્ચ સંતતિઃ ।
ત્વત્સેવાનિરતા ભૂયુર્માતા ત્વં કરુણામયી ॥ ૨૦॥

ન મે વાંછાઽસ્તિ યશસિ વિદ્વત્ત્વે ન ચ વા સુખે ।
પ્રભુત્વં નૈવ વા સ્વર્ગે મોક્ષેઽત્યાનંદદાયકે ॥ ૨૧॥

પરં ચ ભારતે જન્મ માન્વસ્ય ચ વા પશોઃ ।
વિહંગસ્ય ચ વા જન્તોર્વૃક્ષપાષાણયોરપિ ॥ ૨૨॥

નિરન્તરં ભવતુ મે માતૃસેવાંશભાગ્યભાક્ ।
એષૈવ વાઞ્છા હૃદયે સાક્ષી સર્વાત્મકઃ પ્રભુઃ ॥ ૨૩॥

ઇતિ શ્રીભારતભૂમાતૃસ્તોત્રં સમ્પૂર્ણ

Encoded and proofread by Dinesh Agarwal  dinesh.garghouse at gmail.com
Proofread by LakShmi R.S. lakish at gmail.com

*bhAratabhUmAtRistotra*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*